CS (MAIN) EXAM, 2010

Sl. No. 77

D-DTN-K-TLA

# SANSKRIT

## Paper I

## (Literature)

| Time Allowed : Three Hours | Maximum Marks : 300 |
|---|---|

## INSTRUCTIONS

*Candidates should attempt Question Nos. 1 and 5 which are compulsory, and any* ***three*** *of the remaining questions, selecting at least* ***one*** *question from each Section.*

*The number of marks carried by each question is indicated at the end of the question.*

*Question Nos. 1, 5 and 8 must be answered in Sanskrit and the remaining questions must be answered either in Sanskrit or in the medium of examination specified in the Admission Certificate issued to you.*

*Answers written in Sanskrit must be in Devanāgarī script.*

(Contd.)

## Section 'A'

1. (a) अधोलिखितानां समाधानं विधीयताम् — 1×3=3

(i) 'जश्' इति प्रत्याहारेण के वर्णा बोध्यन्ते ?

(ii) मुखसहितया नासिकयोच्चार्यमाणस्य वर्णस्य का संज्ञा ?

(iii) वाच्यपरिवर्तनं क्रियताम् —

समवेता जना दुर्गाप्रतिमां पश्यन्ति ।

(b) अधोनिर्दिष्टानां पदानां नियमोल्लेखपूर्वकं सन्धिविच्छेदः क्रियताम् । 3×4=12

रवावुदिते, यद्यत्र, तट्टीका, उत्थानम् ।

(c) अधःस्थितेषु वाक्येषु रेखाङ्कितानां पदानां कारणोल्लेख-पूर्वकं विभक्तिर्विचार्य्यताम् — 4×5=20

(i) मोदकः शिशुभ्यो रोचते ।

(ii) जनोऽयम् अक्ष्णा काणः ।

(iii) पाचकः पाकाय याति ।

(iv) पथिकोऽसौ व्याघ्राद् बिभेति ।

(v) परिचारिका गां दुग्धं दोग्धि ।

(d) अधोलिखितानां पदानां विग्रहवाक्यं प्रदर्श्यतां समासनाम चोल्लिख्यताम् — 5×5=25

(i) प्रत्यक्षम्

(ii) नीलोत्पलम्

(iii) वीणापाणिः

(iv) रामलक्ष्मणौ

(v) पञ्चवटी

2. (a) नामपद-क्रियापदयोः रूपप्रयोगवैचित्र्यमवलम्ब्य वैदिक-संस्कृतस्य प्रकृतिः वर्ण्यताम् । 30

(b) लौकिकसंस्कृतस्य प्रमुखाः विशेषताः विचार्यन्ताम् । 30

3. (a) अलङ्कारसम्प्रदायं समुपन्यस्य तस्य आचार्यस्य जयदेवस्य मतं विविच्यताम् । 30

(b) किं नाम औचित्यं साहित्ये ? तद्विचारचर्चा विधीयताम् । 30

4. (a) भवभूतेः कस्यचिद् एकस्य नाटकस्य वैशिष्ट्यं विचार्यताम् । 30

(b) कस्यचिद् आधुनिककवेः महाकाव्यस्य समीक्षा विधीयताम् । 30

## Section 'B'

5. अधोलिखितेषु विषयद्वयमवलम्ब्य प्रत्येकं 175 शब्दपरिमितौ निबन्धौ संस्कृतभाषया देवनागर्यक्षरैः लिख्येताम् — 30+30

Write two essays in about 175 words each in Sanskrit on any two of the following topics using Devanāgari script.

(a) शिक्षाव्यवस्थायां नैतिकमूल्यावबोधस्य संयोजनम् ।

(b) अद्यत्वे शिक्षासंस्थासु संरक्षणव्यवस्थायाः युक्तियुक्तता ।

(c) आजीविकारूपेण पत्रकारता ।

(d) विद्या ददाति विनयम् ।

6. (a) स्मृतिशास्त्रोक्तानां प्रमुखानां संस्काराणां नामोल्लेखपूर्वकं भवन्मते महत्त्वपूर्णं संस्कारत्रयं निर्वाच्यताम् । 30

(b) पुरुषार्थचतुष्टयस्य संयोजनव्यवस्थायाः वैशिष्ट्यम् आविष्क्रियताम् । 30

7. (a) वेदान्तदर्शने षट्सम्प्रदायानां नामोल्लेखपूर्वकं तेषु मिथः भेदः विविच्यताम् । 30

(b) सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः — वचनम् एतद् विचार्यताम् । 30

8. अधोलिखितं सन्दर्भं साभिनिवेशं पठित्वा प्रदत्तानां प्रश्नानां यथोचितमुत्तरं प्रदीयताम् । 10×6=60

Answer the questions in Sanskrit on the basis of the passage given below :

कस्मिंश्चिद् वने भासुरको नाम सिंहः प्रतिवसति स्म । अथासौ वीर्यातिरेकात् प्रत्यहं मृगशशकादीननेकान् पशून् व्यापादयति स्म । अथैकदा सर्वे पशवो मिलितास्तमभ्युपेत्य प्रोचुः — स्वामिन् ! किमनेन प्रतिदिनमनेकपशुवधश्रमेण ? एकेनैव पशुना तव प्रात्यह्निकी भोजनतृप्तिः पर्याप्ता स्यात् । तत् क्रियतामस्माभिः सह समयबन्धः । अद्य प्रभृति तवात्रोपविष्टस्य आहारार्थमेकैकः पशुः पर्यायेण प्रत्यहं समेष्यति । एवं कृते तव प्राणयात्रा क्लेशरहिता भवेत् । अस्माकमपि युगपत् सर्वोच्छेदनं न स्यात् ।

अथ तेषां वचनं श्रुत्वा भासुरकः प्रोक्तवान् — सत्यमभिहितं भवद्भिः । भवतां वचनमनुजाने । परन्तु ममात्रोपविष्टस्य आहारार्थं यदि कदाचित् कश्चित् पशुर्नागच्छेत् तर्हि सर्वान् वो मारयित्वा वनमिदं पशुरहितं करिष्यामि । अथ ते पशवस्तथैव प्रतिज्ञाय पर्यायेण एकैकं पशुं तत्समीपे प्रेषयन्तः कथञ्चित् स्वस्था न्यवसन् ।

अथ कदाचित् कस्यचित् वृद्धस्य शशकस्य वारः समायातः। सोऽचिन्तयत् —

उपायं कञ्चिदुद्भाव्य करिष्ये सिंहघातनम्।
पञ्चत्वं चेद् गमिष्यामि किं भयेन ममाधुना॥

एवं विचिन्त्य मन्दं मन्दं चलितः स विलम्बेन सिंहसमीपे समुपस्थितः। अत्यन्तक्षुधापीडितोऽसौ सिंहः, विलम्बेन समागतं तमालोक्य नितरां क्रुद्धः तं पृष्टवान् — कुतस्त्वं विलम्बेनागतोऽसि ? शशकोऽब्रवीत् — देव ! नाहमपराद्धः। यथाकालमागच्छन्नहं पथि सिंहान्तरेण बलाद् धृतः। तस्याग्रे पुनर्गमनाय शपथं कृत्वा स्वामिने भवते निवेदयितुमागतोऽस्मि। श्रुत्वैतत् सिंहः सकोपमाह — सत्वरं गत्वा दर्शय क्वासौ दुरात्मा तिष्ठतीति। ततः शशकस्तं मार्गावस्थितस्यैकस्य गभीरस्य कूपस्य समीपं नीत्वा कूपजले पतितं तस्यैव सिंहस्य प्रतिबिम्बं सिंहान्तरत्वेन अदर्शयत्। कोपाविष्टो भासुरकोऽपि तदेव सत्यं मन्यमानः कूपजले आत्मप्रतिबिम्बस्योपरि निपत्य पञ्चत्वं गतः।

(a) कोऽयं भासुरकः ? स कुत्र न्यवसत् ? किं चाकरोत् ?

(b) सर्वे पशवो मिलितास्तं किमब्रुवन् ?

(c) भासुरकेन किमुत्तरं दत्तम् ?

(d) शशकस्य वारे समायाते तेन किं कृतम् ?

(e) शशकः सिंहाय विलम्बागमनस्य किं कारणमदर्शयत् ?

(f) सिंहः कथं पञ्चत्वं गतः ?

---